বিদ্যাসাগর বিশ্ববিদ্যালয়

# VIDYASAGAR UNIVERSITY

## Question Paper

## B.A. Honours Examinations 2021

**(Under CBCS Pattern)**

## Semester - V

## Subject : SANSKRIT

**Paper : C 11-T**

**VEDIC LITERATURE**

**Full Marks : 60**

**Time : 3 Hours**

*Candidates are required to give their answers in their own words as far as practicable.*
*The figures in the margin indicate full marks.*

Vidyasagar University

अ. अधोनिर्दिष्टेषु चतुर्णां प्रश्नानाम् उत्तरम् प्रदेयम् : 12×4=48

१. दाशतय्यां हिरण्यगर्भसूक्तस्य दार्शनिकतत्त्वं स्फुटीक्रियताम्।

२. अग्निदेवतायाः चारित्रिकं वैशिष्ट्यं सम्यगालोच्यताम्।

३. अथर्ववेदे भूमिसूक्तस्य काव्यसौन्दर्यम् यथायथं प्रतिपाद्यताम्।

४. मुण्डकोपनिषदि वर्णितं सत्यस्य सत्यात्मनश्च सरूपमालोच्यताम्।

५. विद्याः कति प्रकारा भवन्ति? विद्यायाः स्वरूपं मुण्डकोपनिषद्दिशालोच्यताम्।

६. सांमनस्यसूक्तस्य तात्पर्यं सम्यगालोच्यताम्।

७. अक्षसूक्तस्य सामाजिकचित्रं आलोचनीयम्।

८. ऋषिछन्दोदेवतानिर्देशपुर:सरं मन्त्रद्वयं व्याख्येयम्—

(i) अग्निर्होता कविक्रतुः
सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरा गमत्॥

(ii) हिरण्यगर्भः समवर्तताग्रे
भुतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं दयामुतेमां
कस्मै देवाय हविषा विधेम॥

आ. अधोलिखितेषु षट्प्रश्नानां समाधानं संस्कृतभाषया विधेयम् : 2×6=12

१. ''स्त्रियं "दृष्ट्वाय कितवं तताप'' कः परितापं करोति? किं तस्य परितापकारणम्?

२. ''वयं स्याम् पतयो रयीनाम्''—कस्य देवस्य समीपे इयं प्रार्थना? कथं वा एवं प्रार्थना?

३. को नाम पदपाठः? कः वा अस्य प्रवर्तकः?

४. ''यः प्राणतो निमिषतः'' इति मन्त्रे ईश्वरस्य कर्त्तृत्वं पालयितृरूपं कर्मद्वयं व्याख्यायताम्?

५. पृथिव्यादौ कुत्रासीत्? तस्या हृदयं कुत्र वर्तते?

६. मुण्डकोपनिषदः शान्तिमन्त्रः किं भवति?

७. अग्निसूक्ते प्रयुक्तानि अग्निदेवस्य कतिपयानि विशेषणानि उल्लेखनीयानि।

८. ''वाजेन वाजिनि''—कस्याः कृते इदं प्रयुक्तम्? ''वाजेन'' इत्यनेन किं वोध्यम्?

९. यजमानाः केन प्रकारेण अग्निं निकषा समागच्छन्ति?

१०. अक्षसूक्तस्य ऋषि-देवता-छन्दसां नाम लिखतु।

Vidyasagar University